(1)

पद्मंनलिनमरविंदंमहोत्पलं॥सहस्रपत्रंकमलंशतपत्रंकुशेशयं॥८२॥पंकेरुहंतामरसंसारसं
सरसीरुहं॥बिसप्रसूनराजीवपुष्कराम्भोरुहाणिच॥८३॥पुंडरीकंसितांभोजमथरक्तसरोरु
हे॥रक्तोत्पलंकोकनदंनालोनालमथास्त्रियां॥८४॥मृणालंबिसमब्जादिकदंबेषंडमस्त्रियां॥ ख ३
करहाटःशिफाकंदंकिंजल्कःकेसरोस्त्रियां॥८५॥संवर्त्तिकानवदलंबीजकोशोवराटकः॥
इतिवारिवर्गः॥उक्तंस्वर्व्योमदिक्कालधीशब्दादिसनाट्यकं॥पातालभोगिनरकंवारिचैषां
चसंगतं॥८६॥ ॥इत्यमरसिंहकृतौनामलिंगानुशासने॥स्वरादिःप्रथमःकांडःसांगएव
समर्थितः॥वर्गाःपृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः॥नृब्रह्मक्षत्रविट्शूद्रैःसांगोपांगैरिहोदिताः
॥१॥भूर्भूमिरचलानंतारसाविश्वंभरास्थिरा॥धराधरित्रीधरणीक्षोणीज्याकाश्यपीक्षितिः॥२॥
सर्वंसहावसुमतीवसुधोर्वीवसुंधरा॥गोत्राकुःपृथिवीपृथ्वीक्ष्मावनिर्मेदिनीमही॥३॥

श्री पु ३

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

श्रधि...च॥विपुलाकुंभूली धात्री गौरीला कुंभिनी क्षमा॥ जगती रत्नगर्भा सा भूतधात्र्यब्धिमेखला १

(2)

तधात्री रत्नगर्भा विपुला सागरांबरा॥ मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका॥४॥ उ
र्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका॥ ऊषवानूषरो द्वावप्यन्यलिंगौ स्थलं स्थली॥५॥
समानौ मरुधन्वानौ द्वे खिलाप्रहते समे॥ त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्॥६॥ लोको
यं भारतं वर्षं शरावत्यास्तु योवधेः॥ देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः॥७॥ प्रत्यं
चो तो म्लेछदेशः स्यान्मध्यदेशस्तु मध्यमः॥ आर्यावर्तः पुण्यभूमिर्मध्यं विंध्यहिमालयोः॥ तीं
८॥ नीवृज्जनपदो देशविषयौ तूपवर्तनं॥ त्रिष्वगोष्ठान्नडप्राये नड्वान्नड्वल इत्यपि॥९॥ कुमुद्वान्कु ॥१७॥
॥१७॥ मुदप्राये वेतस्वान्बहुवेतसे॥ शाद्वलः शादहरिते सजंबाले तु पंकिलः॥१०॥ जलप्रायमनूपं स्या
त्पुंसि कच्छस्तथाविधः॥ स्त्री शर्करा शर्करिलः शार्करः शर्करावति॥११॥ देश एवादिमावेवमुन्नेयाः
सिकतावति॥ देशो नद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः॥१२॥ स्यान्नदीमातृको देवमातृकश्च यथा

कृष्णाभूमिः कृष्णमृत्...त्रिपुंदस्तु मरुन्मु ...पांडुभूमिः पांडुमृत्... यंस्याद्देशाः ...णां १

(2A)

क्रमं॥सुराज्ञिदेशेराजन्वान्स्यात्ततोन्यत्रराजवान्॥१३॥गोष्ठंगोस्थानकंतत्तुगोष्ठीनंभूतपूर्वकं॥
पर्यंतभूःपरिसरःसेतुरालौस्त्रियांपुमान्॥१४॥वामलूरश्चनाकुश्चवल्मीकंपुंनपुंसकं॥अयनं
वर्त्ममार्गाध्वपंथानःपदवीसृतिः॥१५॥सरणिःपद्धतिःपद्यावर्त्मन्येकपदीतिच॥अतिपंथाःसुपंथाश्च
सत्पथश्चार्चितेध्वनि॥१६॥व्यध्वोदुरध्वोविपथःकदध्वाकापथःसमाः॥अपंथास्त्वपथंतुल्येशृंगाट
कचतुष्पथे॥१७॥प्रांतरंदूरशून्योध्वाकांतारंवर्त्मदुर्गमं॥गव्यूतिःस्त्रीक्रोशयुगंनल्वःकिष्कुःच
तुःशतं॥१८॥घंटापथःसंसरणंतत्पुरस्योपनिष्करं॥द्यावापृथिव्योरोदस्योद्यावाभूमीचरोदसी॥
॥१९॥दिवःपृथिव्योसंज्ञायांतुरुमास्याल्लवणाकरः॥ ॥इतिभूमिवर्गः॥पूःस्त्रीपुरीनगर्योर्वापत्तनंपुट
भेदनं॥स्थानीयंनिगमोन्यत्तुयन्मूलनगरात्पुरं॥२०॥तच्छाखानगरंवेशोवेश्याजनसमाश्रयः॥
आपणस्तुनिषद्यायांविपणिःपण्यवीथिका॥२१॥रथ्याप्रतोलीविशिखास्याच्चयोवप्रमस्त्रियां॥

अधिकंच॥स्यात्साकेतमयोध्यायांविदेहामिथिलापुरी॥महोदयःस्यात्कन्यकुब्जःकन्यकुब्जंमहोदयं॥
काशीवाराणस्यवंतीविशाला॥प्राचोऽप्यइन्यपि॥प्राग्जोतिषंकामरूपंद्वारकाद्वारवत्यपि२

धिष्ण्यमोको निवसनं स्थानावसथवास्तु च। संस्थानमुटजं धाम निवेशः शरणं क्षयः॥

(3)

प्राकारो वरणः सालः प्राचीनं प्रांततो वृतिः॥२२॥ भित्तिः स्त्री कुड्यमेडूकं यदंतर्न्यस्तकीकसं॥ गृहं गेहोदव
सितं वेश्म सद्म निकेतनं॥२३॥ निशांतपस्त्यसदनं भवनागारमंदिरं॥ गृहाः पुंसि च भूम्न्येव निकाय्यनि
लयालयाः॥२४॥ वासः कुटी द्वयोः शाला सभा संजवनं त्विदं॥ चतुःशालं मुनीनां तु पर्णशालोटजोऽ
स्त्रियां॥२५॥ चैत्यमायतनं तुल्ये वाजिशाला तु मंदुरा॥ आवेशनं शिल्पिशाला प्रपा पानीयशालिका॥
२६॥ मठश्छात्रादिनिलयो गंजा तु मदिरागृहं॥ गर्भागारं वासगृहमरिष्टं सूतिकागृहं॥२७॥ वाता
यनं गवाक्षः स्यान्मंडपोऽस्त्री जनाश्रयः॥ हर्म्यादि धनिनां वासः प्रासादो देवभूभुजां॥२८॥ सौधोऽ
॥१८॥ स्त्री राजसदनमुपकार्योपकारिका॥ स्वस्तिकः सर्वतोभद्रो नंद्यावर्तादयोपि च॥२९॥ विच्छंदकप्र ॥१८॥
भेदा हि भवंतीश्वरसद्मनां॥ स्त्र्यगारं भूभुजामंतःपुरं स्यादवरोधनं॥३०॥ शुद्धांतश्चावरोध
श्च स्यादट्टः क्षौममस्त्रियां॥ प्रघाणप्रघणालिंदा बहिर्द्वारप्रकोष्ठके॥३१॥ गृहावग्रहणी देहल्यंग

(3A)

पं॰चत्वराजिरे॥अधस्ताद्दारुणिशिला नासादारूपरिस्थितं॥३२॥प्रछन्नमंतर्द्वारंस्यात्पक्षद्वारंतुपक्षके॥
वलीकनीध्रेपटलप्रांतेथपटलंछदिः॥३३॥गोपानसीतुवलभीछादनेवक्रदारुणि॥कपोतपालिका
यांतुविटंकंपुंनपुंसकं॥३४॥स्त्रीद्वार्द्वारंप्रतीहारःस्याद्वितर्दिस्तुवेदिका॥ तोरणोस्त्रीबहिर्द्वा
रंपुरद्वारंतुगोपुरं॥३५॥कूटंपूर्द्वारियद्धस्तिनखस्तस्मिन्नथत्रिषु॥कपाटमररंतुल्येतद्विष्कंभोर्गलं
नना॥३६॥आरोहणंस्यात्सोपानंनिःश्रेणिस्त्वधिरोहणी॥संमार्जनीशोधनीस्यात्संकरोवकरस्तथा
॥३७॥क्षिप्तेमुखंनिःसरणंसंनिवेशोनिकर्षणं॥समौसंवसथग्रामौवेश्मभूर्वास्तुरस्त्रियां॥३८॥
ग्रामांतउपशल्यंस्यात्सीमसीमेस्त्रियामुभे॥घोषआभीरपल्लीस्यात्पक्कणःशबरालयः॥
३९॥इतिपुरवर्गः॥ ॥महीध्रेशिखरिक्ष्माभृदहार्यधरपर्वताः॥अद्रिगोत्रगिरिग्रावाचलशै
लशिलोच्चयाः॥१॥लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ॥अस्तस्तुचरमक्ष्माभृदुदयः

खैं २

(५)

र्वपर्वतः॥२॥हिमवान्निषधोविंध्योमाल्यवान्पारियात्रकः॥गंधमादनमन्येचहेमकूटादयोनगाः॥
३॥पाषाणप्रस्तरग्रावोपळाश्मानःशिळादृषत्॥कूटोऽस्त्रीशिखरंशृंगंप्रपातस्त्वतटोभृगुः॥४॥क
टकोऽस्त्रीनितंबोद्रेःस्नुःप्रस्थःसानुरस्त्रियां॥उत्सःप्रस्रवणंवारिप्रवाहेनिर्झरोझरः॥५॥दरीतुकंद
रोवास्त्रीदेवखाते बिळेगुहा॥गह्वरंगंडशैलास्तुच्युताःस्थूलोपळागिरेः॥६॥खनिःस्त्रियामाकरः
स्यात्पादाःप्रत्यंतपर्वताः॥उपत्यकाद्रेरासन्नाभूमिरूर्ध्वमधित्यका॥७॥धातुर्मनःशिलाद्यद्रेर्गैरिकं
तुविशेषतः॥निकुंजकुंजौवाक्लीबेलतादिपिहितोदरे॥८॥ ॥इतिशैलवर्गः॥ ॥अटव्यरण्यंविपि
॥१९॥ नंगहनंकाननंवनं॥महारण्यमरण्यानीगृहारामास्तुनिःकुटाः॥१॥आरामःस्यादुपवनंकृत्रि ॥१९॥
मंवनमेवयत्॥अमात्यगणिकागेहोपवनेवृक्षवाटिका॥२॥पुमानाक्रीडउद्यानंराज्ञःसाधा
रणंवनं॥स्यादेतदेवप्रमदवनमंतःपुरोचितं॥३॥वीथ्यालिरावलिःपंक्तिःश्रेणीलेखास्तुराज

२१

स्व१

(5A)

यः॥वन्यावनसमूहेस्यादंकुरोभिनवोद्भिदि॥वृक्षोमहीरुहःशाखीविटपीपादपस्तरुः॥अनोकहःकु
टःशालःपलाशीद्रुद्रुमागमाः॥५॥वानस्पत्यःफलैःपुष्पात्तैरपुष्पाद्वनस्पतिः॥ओषधिःफलपा
कांतास्यादवंध्यःफलेग्रहिः॥६॥वंध्योफलोवकेशीचफलवान्फलिनःफली॥प्रफुल्लोत्फुल्लसं
फुल्लव्याकोशविकचस्फुटाः॥७॥फुल्लश्चैतेविकसितेस्युरवंध्यादयस्त्रिषु॥स्थाणुरस्त्रीध्रुवःशं वाना४
कुर्ह्रस्वशाखाशिफःक्षुपः॥८॥अप्रकांडेस्तंबगुल्मौवल्लीतुव्रततिर्लता॥लताप्रतानिनीवीरु गु५
द्गुल्मिन्युलपइत्यपि॥९॥नगाद्यारोहउच्छ्रायउत्सेधश्चोच्छ्रयश्चसः॥अस्त्रीप्रकांडःस्कंधःस्या
न्मूलाच्छाखावधिस्तरोः॥१०॥समेशाखालतेस्कंधशाखाशालेशिफाजटे॥शाखाशिफावरो
हःस्यान्मूलाच्चाग्रंगतालता॥११॥शिरोग्रंशिखरंवानामूलंबुध्नोंऽघ्रिनामकः॥सारोमज्जासमौ नरि
त्वक्स्त्रीवल्कंवल्कलमस्त्रियां॥१२॥काष्ठंदार्विंधनंत्वेधइध्ममेधःसमित्स्त्रियां॥निःकुहः

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५) कोटरं वा न्या वल्लरिर्मंजरिः स्त्रियौ॥१३॥ पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्॥ पल्लवोस्त्री किसलयं विस्तारो वि
टपोस्त्रियां॥१४॥ वृक्षादीनां फलं सस्यं वृंतं प्रसवबंधनं॥ आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु॥
१५॥ क्षारको जालकं क्लीबे कलिका कोरकः पुमान्॥ स्याद्गुच्छकस्तु स्तबकः कुड्मलो मुकुलोस्त्रियां॥
१६॥ स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमं॥ मकरंदः पुष्परसः परागः सुमनोरजः॥१७॥ द्विहीनं प्रस
वे सर्वं हरीतक्यादयः स्त्रियां॥ आश्वत्थवैणवप्लाक्षनैयग्रोधैंगुदं फले॥१८॥ बार्हतं च फले जंब्वा जं
बूः स्त्री जंबु जांबवं॥ पुष्पे जातिप्रभृतयः स्वलिंगा व्रीहयः फले॥१९॥ विदार्याद्यास्तु मूलेपि पुष्पे
॥२०॥ क्लीबेपि पाटला॥ बोधिद्रुमश्चलदलः पिप्पलः कुंजराशनः॥२०॥ अश्वत्थेथ कपित्थे स्युर्दधित्थग्रा ॥२०॥
हिमन्मथाः॥ तस्मिन्दधिफलः पुष्पफलदंतशठावपि॥२१॥ उदुंबरे जंतुफलो यज्ञांगो हेमदुग्धकः॥
कोविदारे चमरिकः कुद्दालो युगपत्रकः॥२२॥ सप्तपर्णो विशालत्वक्शारदो विषमच्छदः॥ आर

सूक्ष्मपत्राश्कद्र जंब. ड॰१ राजजंबू महाफला ४

पारिभद्रे निंबतरुर्मंदारः पारिजातकः॥ तिनिशः स्यंदनो नेमी रथद्रुरतिमुक्तकः २

ख२ ता१

स्वधेराजवृक्षसम्याकचतुरंगुलाः॥२३॥ आरेवतव्याधिघातकृतमालसुवर्णकाः॥ स्युर्जंबीरे दंतशठ

(5A) जंबजंभीरजंभलाः॥२४॥ वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः॥ पुन्नागे पुरुषस्तुंगः केसरो

देववल्लभः॥२५॥ वंजुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ॥ आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ॥२६॥

वानप्रस्थमधुष्ठीलो जलजेऽत्र मधूलकः॥ पीलौ गुडफलः स्रंसी तस्मिंस्तु गिरिसंभवे॥२७॥ अक्षोट

कंदरालौ द्वावंकोटे तु निकोचकः॥ पलाशे किंशुकः पर्णो वातपोथोऽथ वेतसे॥२८॥ रथाभ्रपुष्पविदु ना ५

लशीतवानीरवंजुलाः॥ द्वौ परिव्याधविदुलौ नादेयी चांबुवेतसे॥२९॥ शोभांजने शिग्रुतीक्ष्णगंध

काक्षीवमोचकाः॥ रक्तोऽसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ॥३०॥ बिल्वे शांडिल्यशैलूषौ मालू

रश्रीफलावपि॥ प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः॥३१॥ गालवः शाबरो लोध्रस्तिरीटस्ति

ल्वमार्जनौ॥ आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः॥३२॥ कुंभोलूखलकं क्लीबे कौशिको गु

धो २ कामांगो मधुदूतश्च माकंदः पकवल्लभः

नारंगो मुखवासनः॥ जंबू सुरभिपत्रा च राजजंबूर्महाफला॥ स्त्रह्रस्वपत्रा क्षुद्रजंबू ४

(6)

३३

गुलः क्षुरः॥ शेलुश्लेष्मातकश्शीतउद्दालो बहुवारकः॥ राजादनं प्रियालुः स्यात्सन्नकद्रुर्धनुष्पटः॥ गं
भारी सर्वतोभद्रा काश्मरी मधुपर्णिका॥३४॥ श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः॥ कर्कंधु
बदरी कोलिः कोलं कुवल फेनिले॥३५॥ सौवीरं बदरं घोंटा प्यस्यात्स्वादुकंटकः॥ विकंकतस्रुवा प्य
वृक्षो ग्रंथिलो व्याघ्रपादपि॥३६॥ ऐरावतो नागरंगो नादेयी भूमिजंबुका॥ तिंदुकः स्फूर्जकः का
लस्कंधश्च शितिसारके॥३७॥ काकेंदुः कुलकः काकतिंदुकः काकपीलुके॥ गोलीढो झाटलो घं
टापाटलिर्मोक्षमुष्कको॥३८॥ तिलकः क्षुरकः श्रीमान्समौ पिचुलझाबुकौ॥ श्रीपर्णिका कुमुं
॥२१॥ दिका कुंभी कैडर्यकटफलौ॥३९॥ क्रमुकः पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः॥ तूदस्तू ॥२१॥
पः क्रमुको ब्रह्मण्यो ब्रह्मदारु च॥४०॥ तूलं च नीपप्रियककदंबास्तु हलिप्रिये॥ वीरवृक्षोऽ
रुष्करोऽग्निमुखी भल्लातकी त्रिषु॥४१॥ गर्दभांडे कंदरालकपीतनसुपार्श्वकाः॥ प्लक्षश्च तिंति

दूफ्र ३ रिर

(6A)

इंगुदी तापसतरुर्भूर्जे चर्म्मिम्रदुत्वचौ ॥ पिछिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ॥ ४४३

द्वी चिंचाम्लिका थोपीतसालके ॥४२॥ सर्ज्जकासनबंधूकपुष्पप्रियकजीवकाः ॥ साले तु सर्ज्जका
र्च्याश्वकर्णकाः सस्यसंबरः ॥४३॥ नदीसर्ज्जो वीरतरु रिंद्रद्रुः ककुभोर्ज्जुनः ॥ राजादनः फलाध्यक्षः
क्षीरिकायामथद्वयोः ॥४४॥ पिछा तु शाल्मलीवेष्टे रोचनः कूटशाल्मलिः ॥ चिरिबिल्वो नक्त
मालः करजश्च करंजके ॥४६॥ प्रकीर्य्यः पूतिकरजः पूतिकः कलिमारकः ॥ करंजभेदाः षड्ग्रंथो मर्क
ट्यंगारवल्लरी ॥४७॥ रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ॥ गायत्री बालतनयः खदिरो दं — पत्रश्च
तधावनः ॥४८॥ अरिमेदो विट्खदिरे कदरः खदिरे सिते ॥ सोमवल्कोप्यथ व्याघ्रपुछगंधर्वहस्तकौ ॥४९॥ — त्वको
एरंड उरुबूकश्च रुचकश्चित्रकश्च सः ॥ चंचुः पंचांगुलो मंडवर्द्धमानव्यडंबकाः ॥५०॥ अल्पा शमी श — बे
मीरः स्याच्छमी सक्तुफला शिवा ॥ पिंडीतको मरुबकः श्वसनः करहाटकः ॥५१॥ शल्यश्च मदने शक्र
पादपः पारिभद्रकः ॥ भद्रदारु द्रुकिलिमं पीतदारु च दारु च ॥५२॥ पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ

चू१

(७) द्वयोः॥पाटलिःपाटलामोघाकाचस्थालीफलेरुहा॥५३॥कृष्णवृंताकुबेराक्षीश्यामातुमहिलाह्वय॥
लतागोवंदनीगुंद्राप्रियंगुःफलिनीफली॥५४॥विष्वक्सेनागंधफलीकारंभीप्रियकश्चसा॥मंडूक
पर्णपत्रोर्णनटकट्वंगटुंटुकाः॥५५॥स्योनाकशुकनासर्क्षदीर्घवृंतकुटंनटाः॥शोणकश्चारलो
तिष्यफलात्वामलकीत्रिषु॥५६॥अमृताचवयःस्थाचत्रिलिंगस्तुबिभीतकः॥ [illegible] स [illegible] स्तुषःकर्षफ २१४
३ लोभूतावासःकलिद्रुमः॥५७॥अभयात्वव्यथापथ्याकायस्थापूतनाऽमृता॥हरीतकीहैमवतीचे
तकीश्रेयसीशिवा॥५८॥पीतद्रुःसरलःपूतिकाष्ठंचाथद्रुमोत्पलः॥कर्णिकारःपरिव्याधोलकुचो ॥२२॥
॥२२॥ लिकुचोऽडुहः॥५९॥पनसःकंटकिफलोनिचुलो [illegible] ज्जलोंऽबुजः॥काकोदुंबरिकाफल्गुर्म्मलपूर्ज
घनेफला॥६०॥अरिष्टःसर्वतोभद्रहिंगुनिर्यासमालकाः॥पिचुमंदश्चनिंबेथपिछुलागुरुशिंश
पा॥६१॥कपिलाभस्मगर्भासाशिरीषस्तुकपीतनः॥भंडिलोप्यथचांपेयश्चंपकोहेमपुष्पकः॥

(7A)

वेणी रव रागरीदेव
ताडीजीमूतइत्यपि ॥५

६२॥एतस्यकलिकागंधफली स्यादथ केसरे॥बकुलो वंजुलोऽशोके समौ करकदाडिमौ॥६३॥चांपे
यः केसरो नागकेसरः कांचनाह्वयः॥जयाजयंतीतर्कारी नादेयी वैजयंतिका॥६४॥श्रीपर्णमग्निमंथः
स्यात्कणिका गणिकारिका॥जयोथ कुटजः शक्रो वत्सको गिरिमल्लिका॥६५॥एतस्यैव कलिंगेंद्रय
वभद्रयवं फले॥ कृष्णपाकफ[illegible] विग्न सुषेणाः करमर्दकः॥६६॥कालस्कंधस्तमालः स्यात्तापिच्छोप्यथ
सिंदुकः॥सिंदुवारेंद्रसुरसौ निर्गुंडीद्राणिकेत्यपि॥६७॥श्री हस्तिनी तु भरुंडी त्वणशूल्यं तु मल्लिका
॥६८॥भूपदी शीतभीरुश्च सैवास्फोता वनोद्भवा॥[illegible]॥शेफालिका तु सुवहा निर्गुंडी नीलिका च
सा॥६९॥सितासौ श्वेतसुरसा भूतवेश्यथ मा[illegible]धी॥गणिकायूथिकांबष्ठासी पीता हेमपुष्पिका॥
७०॥अतिमुक्तः पुंड्रकः स्याद्वासंती माधवीलता॥सुमना मालती जातिः सप्तला नवमालिका॥
७१॥माध्यं कुंदं रक्तकस्तु बंधूको बंधुजीवकः॥सहाकुमारी तरणिर[illegible]नम्लानमहासहा॥७२॥

ल१ ले३

(४) तत्रशोणेकुरबकस्तत्रपीतेकुरंटकः॥नीलाझिंटीद्वयोर्बाणादासीचार्तगलश्चसा॥७३॥सैरेयकस्तुझिं
टीस्यात्तस्मिन्कुरबकोरुणे॥पीताकुरंटकोझिंटीतस्मिन्सहचरीद्वयोः॥७४॥उड्रपुष्पंजपावज्रेपुष्पं
पुष्पंतिलस्ययत्॥प्रतिहासशतप्रासचंडातहयमारकाः॥७५॥करवीरेकरीरेतुक्रकेरग्रंथि छा२
वुभौ॥उन्मत्तःकितवोधूर्तोधत्तूरःकनकाह्वयः॥७६॥मातुलोमदनश्चास्यफलेमातुलपुत्रकः॥फ
लपूरोबीजपूरोरुचकोमातुलुंगके॥७७॥समीरणोमरुबकःप्रस्थपु ष्पःफणिज्जकः॥जं
बीरोप्यथपर्णासेकठिंजरकुठेरकौ॥७८॥सितेर्जकोत्रपाठीतुचित्रकोवह्निसंज्ञकः॥अर्की
॥२३॥ ह्ववसुकास्फोतगणरूपविकीरणाः॥७९॥मंदारश्चार्कपर्णोत्रशुक्लेलर्कप्रतापसौ॥शिवमल्ली ॥२३॥
पाशुपतएकाष्ठीलोबुकोवसुः॥८०॥वंदावृक्षादनीवृक्षरुहाजीवंतिकेत्यपि॥वत्सादनीछिन्नरु
हागुडूचीतंत्रिकामृता॥८१॥जीवंतिकासोमवल्लीविशल्यामधुपर्ण्यपि॥मूर्वादेवीमधुरसामो

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

रटा तेजनी स्त्रवा ॥८२॥ मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥ पाठांबष्ठा विद्धकर्णी स्थापनी श्रे
यसी रसा ॥८३॥ एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ॥ कटुः कटंभरा रोहिणी कटुरोहिणी
॥८४॥ मत्स्यपित्ता कृष्णभेदी चक्रांगी शकुलादनी ॥ आत्मगुप्ता जहा व्यंडा कंडूरा प्रावृषायणी ॥८५॥
ऋष्यप्रोक्ता शूकशिंबिः कपिकच्छुश्च मर्कटी ॥ चित्रोपचित्रा न्यग्रोधी द्रवंती संबरी वृषा ॥८६॥ प्र
त्यक्श्रेणी सुतश्रेणी रंडा मूषिकपर्ण्यपि ॥ अपामार्गः शैखरिको धामार्गव मयूरकौ ॥८७॥ प्रत्य
वै क्पर्णी कीशपर्णी किणिही खरमंजरी ॥ हंजिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥८८॥ अं प
गारवल्ली बालेयशाक बर्बर वर्द्धकाः ॥ मंजिष्ठा विकसा जिंगी समंगा कालमेषिका ॥८९॥ मंडूकप
र्णी भंडीरी भंडी योजनवल्ल्यपि ॥ यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥९०॥ रोदनी कच्छु
रानंता समुद्रांता दुरालभा ॥ पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यंघ्रिपर्णिका ॥९१॥ क्रोष्टुविन्ना सिं



Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

हपुष्टी कलशि र्धावनिर्गुहा ॥ निदिग्धिका स्पृशी व्याघ्री बृहती कंटकारिका ॥ ९२ ॥ प्रबोदनी कुली क्षुद्रा
दुःस्पर्शा राष्ट्रिकेत्यपि ॥ नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ॥ ९३ ॥ रंजनी श्रीफली तुच्छा
द्रोणी दोला वनी लिनी ॥ अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ॥ ९४ ॥ कालमेषी कृष्णफ
ला बाकुची पूतिफल्यपि ॥ कृष्णापकुल्या वैदेही मागधी चपला कणा ॥ ९५ ॥ उषणा पिप्पली शौंडी
कोला थ करिपिप्पली ॥ कपिवल्ली कोलवल्ली श्रेयसी वसिरः पुमान् ॥ ९६ ॥ चव्यं तु चविका काके चिंचीडुं
तेतु कृष्णा ॥ पलंकषा त्विक्षुगंधा स्वदंष्ट्रा स्वादुकंटकः ॥ ९७ ॥ गोकंटको गोक्षुरको वनशृंगाटइत्यपि ॥
॥२५॥ विश्वा विषा प्रतिविषातिविषोपविषारुणा ॥ ९८ ॥ शृंगी महौषधं चाथ क्षीरावी दुग्धिका समे ॥ शतमू ॥२५॥
ली बहुसुताभीरुरिंदीवरी वरी ॥ ९९ ॥ ऋष्यप्रोक्ताभीरुपत्री नारायण्यः शतावरी ॥ अहेरुरथ पीत
द्रुः कालीयक हरिद्रवः ॥ १०० ॥ दार्वी पचंपचा दारुहरिद्रा पर्जनीत्यपि ॥ वचोग्रगंधा षड्ग्रंथा गोलोमी श

लपर्विका॥१०१॥शुक्ला हैमवती वैद्यमात्रसिंह्यौ तु वाशिका॥वृषोटरूषः सिंहास्यो वासको वाजि
दंतकः॥२॥आस्फोता गिरिकर्णी स्याद्विष्णुक्रांतापराजिता॥ईक्षुगंधा तु कांडेक्षुकोकिलाक्षेक्षुरक्ष
रा॥३॥शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मिसिः॥मिश्रेयोप्यथ सीहुंडो वज्रः स्नुक्स्त्री स्नुही
गुडा॥४॥समंतदुग्धाथो वेल्लममोघा चित्रतंडुला॥तंडुलश्च कृमिघ्नश्च विडंगः पुंनसकं॥५॥बला वाट्या
लको घंटारवा तु शणपुष्पिका॥मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च॥६॥सर्वानुभूतिः सर
ला त्रिपुटा त्रिवृता त्रिवृत्॥त्रिभंडी रोचनी श्यामा पालिंद्यौ तु सुषेणिका॥७॥काला मसूरविदलार्ध सर
चंद्रा कालमेषिका॥मधुकं क्लीतकं यष्टीमधुकं मधुयष्टिका॥८॥विदारी क्षीरशुक्लेक्षुगंधा क्रोष्ट्री त्रीउ
तु या सिता॥अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगंधिका॥९॥लांगली शारदी तोयपिप्पली शू
कुलादनी॥खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः॥१०॥गोपी श्यामा शारिवा स्यादनंतोसल

(१०)

रिवा॥ पोम्यम्यहि: सिद्धिलक्ष्म्यौवृद्धेरप्याह्वयाइमे॥११॥ कदलीवारणाबुसारंभामोचांशुमत्सला॥ काष्ठी
लामुद्गपर्णी तु काकमुद्गा सहेत्यपि॥१२॥ वार्त्ताकी हिंगुली सिंही भंटाकी दुःप्रध र्षिणी॥ नाकुली सु
३ रसा रास्ना सुगंधा गंधनाकुली॥१३॥ नकुलेष्टा भुजंगाक्षी छत्राकी सुवहा चसा॥ विदारिगंधांशु
मती शालपर्णी स्थिरा ध्रुवा॥१४॥ तुंडिकेरी समुद्रांता कार्प्पासी बदरेति च॥ भारद्वाजी तु सा वन्या
शृंगी तु वृषभो वृषः॥१५॥ गांगेरुकी नागबला झषा ह्रस्वगवेधुका॥ धामार्गवो घोषकः स्यान्महाजाकी वो५
सपीतकः॥१६॥ ज्योत्स्नी पटोलिका जाली नादेयी भूमिजंबुका॥ स्याल्लांगलिक्यग्निशिखा काकां
॥२५॥ गीकाकनासिका॥१७॥ गोधा पदी तु सुवहा मुसली तालमूलिका॥ अज शृंगी विषाणी स्याद्गो ॥२५॥
जिह्वादार्विके समे॥१८॥ तांबूलवल्ली तांबूली नागवल्ल्यप्यथ द्विजा॥ हरेणू रेणुका कौंती कपिला
भस्मगंधिनी॥१९॥ एला वालुकमै लेयं सुगंधि हरिवालुकं॥ वालुकं चाथ पालंक्यां मुकुंदः कुंदकुं

ला

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A)

दुरूः॥२०॥वालेयं ह्रीवेरबर्हिष्ठोदीच्यंकेशांबुनाम च॥ कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु॥
२१॥शैलेयं तालपर्णी तु दैत्या गंधकुटी मुरा॥ गंधिनी गजभक्षा तु सुवहा सुरभी रसा॥२२॥महेरु
णा कुंदुरुकी सल्लकी ह्लादिनीति च॥ अग्निज्वाला सुभिक्षे तु धातकी धातृपुष्पिका॥२३॥पृथ्वीका
चंद्रबालैला निष्कुटिर्बहुलाथ सा॥ सूक्ष्मोपकुंचिका तुच्छा कोरंगी त्रिपुटा त्रुटिः॥२४॥व्याधिः कुष्ठं पारि
भाव्यं वाप्यं पाकलमुत्पलं॥ शंखिनी चोरपुष्पी स्यात्केशिन्यथ वितुन्नकं॥२५॥झटामलाऽझटाता
ली शिवा तामलकीति च॥ प्रपौंडरीकं पौंड्र्यमथ तुन्नः कुबेरकः॥२६॥तुणिकच्छः कांतलको नंदिवृक्षो
थ राक्षसी॥ चंडा धनहरी क्षेम दुःपत्रगणहासकाः॥२७॥व्यालायुधं व्याघ्रनखं करजं चक्रकारकं॥सु
षिरा विद्रुमलता कपोतांघ्रिर्नटी नली॥२८॥धमन्यंजनकेशी च हनुर्हट्टविलासिनी॥शुक्तिः शंखः
खुरः कोलदलं नखमथाढकी॥२९॥काक्षी मृत्स्ना तुवरिका मृत्तालकसुराष्ट्रजे॥कुटंनटं दाशपुरं वाले

कु

पंपारिपेलवं॥२३०॥लवंगोपुरगोनर्द्द केवन्नीमुस्तकानिव॥ग्रंथिपर्णंशुकंबर्हपुष्पंस्थौणेय
कुक्कुरे॥२३१॥मरुन्माळातुपिशुनास्पृक्कादेवीलताल घुःसमुद्रांताव धूःकोटिवर्षालंको
पिकेत्यपि॥२३२॥तपस्विनीजटामांसीजटिलालोमशामिषी॥त्वक्पत्रमुत्कटं भृंगंत्व
चंचोचंवरांगकं॥२३३॥कर्चूरकोद्राविडकःकाल्पकोवेधमुख्यकः॥ओषध्योजातिमात्रे
स्युरजातौसर्वमौषधं॥२३४॥शाकाख्यंपत्रपुष्पादितंडुलीयोल्पमारिषः॥विशल्याग्निशि
खानंतानकलिनींपुष्पापि॥२३५॥स्याद्दसगंधाछगलांत्री वेगीवृद्धदारकः॥जुंगोब्राह्मी
तुमत्स्याक्षीवयस्थासोमवल्लरी॥२३६॥पटुपर्णीहैमवतीस्वर्णक्षीरीहिमावती॥हयपु
च्छीतुकांबोजीमाषपर्णीमहासहा॥२३७॥तुंडिकेरीरक्तफलाबिंबिकापीलुपर्ण्यपि॥
वर्वराकबरीतुंगी खरपुष्पाजगंधिका॥२३८॥एलापर्णीतुसुवहारास्नायुक्तरसा





Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1A)

श्री

ग ४

चसा॥ चांगेरी चुक्रिका दंतशठांबष्ठाम्ललोणिका॥ ३९॥ सहस्रवेधी चुक्रोम्लवेतसः शतवेध्यपि॥ नम
स्कारी गंडकारी समंगा खदिरेत्यपि॥ ४०॥ जीवंती जीवनी जीवा जीवनीया मधुस्रवा॥ कूर्चशीर्षो मधुक
रः श्रृंगह्रस्वांगजीवकाः॥ ४१॥ किराततिक्तो भूनिंबो नार्यतिक्तोथ सप्तला॥ विमला सातला भूरिफेना च
र्मकषेत्यपि॥ ४२॥ वायसोली स्वादुरसा वयस्थाथ मकूलकः॥ निकुंभो दंतिका प्रत्यक्श्रेण्युदुंबरप
र्ण्यपि॥ ४३॥ अजमोदा तूग्रगंधा ब्रह्मदर्भा यवानिका॥ मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे॥ ४४॥
अव्यथातिचरा पद्मा चारटी पद्मचारिणी॥ कर्कशश्चंद्रो रक्तांगो रोचनीत्यपि॥ ४५॥ प्रपुन्ना
टस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः॥ पद्माट उरणा ख्यश्च पलांडुस्तु सुकंदकः॥ ४६॥ लतार्कदुद्रुमो
तत्र हरितेथ महोषधं॥ लसुनं गृंजनारिष्टमहाकंदरसोनकाः॥ ४७॥ पुनर्नवा तु शोथघ्नी वितुन्नं सुनिष

कांपिल्यः ३

२०

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com